श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीसूक्तम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीसूक्तम् ॥

॥ हरिः ओं ॥ हिर॑ण्यवर्णां॒ हरि॑णीं सुव॒र्णर॑जत॒स्र॑जाम्। च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥ तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म्। यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान॒हम् ॥ अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॑द प्र॒बोधि॑नीम्। श्रियं॑ दे॒वी-मुप॑ह्वये॒ श्रीर्मा॑दे॒वी जु॑षताम् ॥ कां॒ सो᳚स्मि॒तां हिर॑ण्यप्राकारामा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम्। प॒द्मे॒ स्थि॒तां प॒द्मव॑र्णां॒ त्वामि॒होप॑ह्वये॒ श्रियम् ॥ च॒न्द्रां प्र॑भा॒सां य॒शसा॒ ज्वल॑न्तीं॒ श्रियं॑ लो॒के दे॒वजु॑ष्टामु॒दा॒राम्। तां प॒द्मने॑मीं॒ शर॑णम॒हं प्रप॑द्येऽल॒क्ष्मीर्मे॑ नश्यतां॒ त्वां वृ॑णे ॥ आ॒दि॒त्यव॑र्णे॒ तप॒सोऽधि॑ जा॒तो वन॒स्पति॒स्तव॑ वृ॒क्षोथ॑ बि॒ल्वः। तस्य॒ फला॑नि॒ तप॒सा नु॑दन्तु मा॒यान्त॑रा॒याश्च॑ बा॒ह्या अ॑ल॒क्ष्मीः ॥ उपै॑तु॒ मां दे॑वस॒खः की॒र्ति-श्च॒ मणि॑ना स॒ह। प्रा॒दु॒र्भू॒तोऽस्मि॑ राष्ट्रे॒ऽस्मि॒न् की॒र्तिमृ॑द्धिं द॒दातु॑ मे ॥ क्षु॒त्पि॑पा॒सा-म॑लां ज्ये॒ष्ठाम॒ल॒क्ष्मीर्ना॑शया॒म्यहम्। अभू॑ति॒मस॑मृद्धिं॒ च सर्वां॒ निर्णु॑द मे॒ गृहात् ॥ ग॒न्ध॒द्वा॒रां दु॑राध॒र्षां॒ नि॒त्यपु॑ष्टां करी॒षिणी᳚म्। ई॒श्वरीग्ं॑ सर्व॑भूता॒नां॒ तामि॒होप॑ह्वये॒ श्रियम् ॥

मन॑सः॒ काम॒माकू॑तिं वा॒चस्स॒त्यम॑शीमहि। प॒शु॒नां रू॒पमन्न॑स्य॒ मयि॒ श्रीश्श्र॑यतां॒ यशः॑ ॥ क॒र्दमे॑न प्र॒जा भू॒ता म॒यि॒ संभ॑व क॒र्दम। श्रियं॑ वा॒सय॑ मे कु॒ले मा॒तरं॑ प॒द्ममा-लि॑नीम् ॥ आपः॑ सृ॒जन्तु॑ स्नि॒ग्धा॒नि॒ चि॒क्ली॒त व॑स मे॒ गृहे। नि च॑ दे॒वीं मा॒तरं॒ श्रियं॑ वा॒सय॑ मे कु॒ले। आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं॒ पि॒ङ्ग॒ळां प॑द्ममा॒लिनीम्। च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह ॥ आ॒र्द्रां य॒ः करि॑णीं य॒ष्टिं॒ सु॒व॒र्णां हे॑ममा॒लिनीम्। सू॒र्यां हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह। तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मि-नी᳚म्। यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्यो᳚ऽश्वा᳚न् वि॒न्देयं॒ पुरु॑षान॒हम् ॥ पद्मप्रिये पद्मि-

नि प॑द्मह॒स्ते॒ पद्मालये पद्मदळा॑यता॒क्षि। विश्वप्रिये विष्णु॒मनो॑ऽनु॒कू॒ले त्वत्पा॑दप॒द्मं मयि॒ सन्नि॑धत्स्व॥ श्रियै॑ जा॒त श्रिय॒ आनिर्या॑य॒ श्रियं॒ वयो॑ जनि॒तृभ्यो॑ दधातु॒। श्रियं॒ वसा॑ना अमृत॒त्वमाय॒न् भव॑न्ति स॒द्यस्समि॒धा मि॒तद्यू॒न्॥ श्रिय एवैनं तच्छ्रियामा॑-दधा॒ति। सन्ततमृचा वषट्कृत्यं सन्धत्तं सन्धीयते प्रज॑या प॒शुभिः॑। य ए॑वं वे॒द॥ ओं म॒हा॒दे॒व्यै च॑ वि॒द्महे॑ विष्णुप॒त्न्यै च॑ धीमहि। तन्नो॑ लक्ष्मीः प्रचो॒दया᳚त्॥